# Shri Datta Ashishah

# श्री दत्ताशिषः

## Document Information

Text title : Shri Datta Ashishah

File name : dattAshiShaH.itx

Category : deities_misc, gurudev, dattatreya, shrIdharasvAmI, stotra

Location : doc_deities_misc

Author : Shridharasvami

Description/comments : shrIdharasvAmI stotraratnAkara

Acknowledge-Permission: Upendra Shripad Dasare, https://shridharamrut.com

Latest update : November 8, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 30, 2022

*sanskritdocuments.org*

# श्री दत्ताशिषः

(स्रग्धरावृत्तम्)

रामो लोकाभिरामो जनकृतजपतो भक्तितः सुप्रसन्नः
भूत्वेदं विश्वमेवं ह्यवतु निशि दिवा पोषयन् वेदधर्मम् ।
भक्तिं भुक्तिं च दत्वा सुकृतिमपि तथा सन्मतिं शान्तचेताः
आत्मज्ञानं स्वनिष्ठां स्वपरहितभृतं जीवनं मुक्तिमेवम् ॥ १॥

ब्रह्मेशानादिरूपैर्जयतु भवहरो जानकीप्राणनाथः
धीरो वीरो हनुमान् जयतु गुरूरहो रामदासो यमिन्द्रः ।
वेदो यो विश्वसेतुर्जयतु भयहरो विश्वमोक्षैकहेतुः
शान्तो दान्तश्च तृप्तो जयतु मुनिगणो ज्ञानविज्ञानपूर्णः ॥ २॥

राष्ट्रं च यूयं सकलजगति भो ब्राह्मणा ब्रह्मनिष्ठाः
स्वाध्यायासक्तचित्ता विरतिमतियुता भक्तिनम्रा गुणाढ्याः ।
गां देवं वेदमेवं गुरूमपि च तथा सर्वदा सेवमानाः
शुध्दाः श्रेष्ठाश्च शान्ताः श्रुतियुतकृतिभिः प्रीणयन्तोत्र विश्वम् ॥ ३॥

भूयाद्धर्मप्रवृत्तं जगदिदमनिशं सर्वदा भक्तिनम्रं
नन्देत्सर्वत्र सर्वं विरतिमतियुतं कर्मभिः पावनैश्च ।
भो भो विप्राश्च युष्मत्सुकृतिभरवशान्मङ्गलं सर्वतः स्यात्
सर्वेषां जीवनं तत्कलिमलरहितं स्वात्मनिष्ठं सुदिव्यम् ॥ ४॥

इति श्रीमत् परमहंसपरिव्राजकाचार्य सद्गुरू भगवान
श्रीधरस्वामीमहाराजविरचितः दत्ताशिषः सम्पूर्णः ।

pdf was typeset on November 30, 2022

Please send corrections to *sanskrit@cheerful.com*